तिलकं लाञ्छनं शोणं यस्या वामकुचे भवेत् ॥
एकं पुत्त्रं प्रसूयादौ अन्ते च विधवा भवेत् ।
गुह्यस्य दक्षिणे भागे तिलकं यदि योषितः ॥
तदा क्षितिपतेः पत्नी सूते च क्षितिपं सुतम् ।
नासाग्रे मशकः शोणो महिष्या एव जायते ॥
कृष्णः स एव भर्त्तृघ्न्याः पुंश्चल्या वा प्रकीर्त्तितः ।
नाभेरधस्तात् तिलकं मशको लाञ्छनं शुभम् ॥
मशकस्तिलकं चिह्नं गुल्फदेशे दरिद्रकृत् ॥
सुलक्षणापि दुःशीला कुलक्षणशिरोमणिः ॥
कुलक्षणापि या साध्वी सर्व्वलक्षणभूस्तु सा ।
कृष्णा कपिलकेशी च मिलितभ्रूकुटिस्तथा ।
गमनं सत्वरञ्चैव त्यक्तव्या स्यात् सदा बुधैः ॥
यस्या गमनमात्रेण भूमौ कम्पः प्रजायते ।
बह्वाशिनीं प्रलोभाश्च तां नारीं परिवर्जयेत् ॥
विरला दशना यस्याः कृष्णोष्ठी कृष्णजिह्विका
भर्त्तारं प्रथमं हन्ति द्वितीयञ्चैव विन्दति ॥
अङ्गुली विरला यस्याः सलोमा गात्रकर्कशा ।
भेका भेकस्तनी क्षुद्रा दूरतः परिवर्जयेत् ॥
त्रीणि यस्याः प्रलम्बानि ललाटं उदरं भगम् ।
त्रीणि सा भक्षयेन्नारी श्वशुरं देवरं पतिम् ॥
ललाटे श्वशुरं हन्यात् जठरे देवरं तथा ।
भगञ्च हन्याद्भर्त्तारं महादोषास्त्रयः स्मृताः ॥
यस्या अत्युत्कटं नार्य्या वचश्च विस्तृतं भवेत् ।
उत्तरोष्ठे च लोमानि शीघ्रं सा भक्षयेत् पतिम् ॥
चरणानामिका यस्याः क्षितिं न स्पृशते यदि ।
द्वितीया वा तृतीया वा सा कन्या सुखवर्ज्जिता ॥
नासाग्रे दृश्यते यस्याः तिलकं मशकोऽपि च ।
कृष्णदन्ता कृष्णजिह्वा दशाहेन पतिं हरेत् ॥
सूक्ष्मकेशा तु या कन्या गौरवर्णा च या भवेत्
अष्टौ जनयते पुत्त्रान् प्राप्नोति विपुलं सुखम् ॥"
इति सामुद्रके स्त्रीलक्षणं समाप्तम् ॥
( समुद्रसम्बन्धिनि, त्रि । यथा, महाभारते । ५ । ३५ । ४४ ।
"सामुद्रकं वाणिजकञ्च चौरं
शलाकधूर्त्तञ्च चिकित्सकञ्च ।
अरिञ्च मित्रञ्च कुशीलवञ्च
नैतान् साक्ष्ये त्वधिकुर्व्वीत सप्त ॥")

सामुद्रिकः, त्रि, ( समुद्रेण प्रोक्तं शास्त्रमधीते वेत्तीति वा । ठञ् ।) स्त्रीपुंसचिह्नवेत्ता । इति हारावली ॥ समुद्रसम्बन्धी च ॥ ( यथा, महाभारते । १२ । १६८ । २ ।
"सामुद्रिकान् स वणिजस्ततोऽपश्यत् स्थितान् पथि ।
स तेन सह सार्थेन प्रययौ सागरं प्रति ॥")

साम्नी, स्त्री, वैदिकच्छन्दोविशेषः । इति केचित् ॥

साम्परायिकं, क्ली, ( संपरायाय विपदे प्रभवतीति । संपराय+"तस्मै प्रभवति सन्तापादिभ्यः ।"५ । १ । १०१ । इति ठञ् ।)युद्धम् । इत्यमरः । २ । ८ । १०४ ॥ ( सम्पराये उत्तरकाले हितम् । सम्पराय+ठक् । ) पारलौकिके, त्रि । यथा,—
"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते ।
न साम्परायिकं तस्य दुर्म्मतेर्व्विद्यते फलम् ॥"
इति मनुः । ११ । ३० ।
( सम्परायं युद्धमर्हतीति । तदर्हतीति ठक् । युद्धार्हे, त्रि । यथा, रघुः । १७ । ६२ ।
"पित्रा संवर्द्धितो नित्यं कृतास्त्रः साम्परायिकः
तस्य दण्डवतो दण्डः स्वदेहान्न व्यशिष्यत ॥")

साम्प्रतं,व्य, (सम् च प्रति च द्वयोः समाहारः । ततः प्रज्ञाद्यण् । ) युक्तम् । ( यथा, कुमारे । २ । ५५ ।
"इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥")
इदानीम् । इत्यमरः । ३ । ४ । ११ । २३ ॥
( यथा, ऋतुसंहारे । १ । ७ ।
"समुद्गतस्वेदचिताङ्गसन्धयो
विमुच्य वासांसि गुरूणि साम्प्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयन्ति प्रमदाः सयौवनाः ॥"*
सम्प्रति भवं साम्प्रतम् । अण् । इदानीन्तने, त्रि । यथा, हरिवंशे । ६ । १६ ।
"वैवस्वतेऽन्तरे चास्मिन् साम्प्रते समुपस्थिते ।
वैण्यात् प्रभृति राजेन्द्र सर्व्वस्यैतस्य सम्भवः ॥"
तथाच तत्रैव । ७ । ३७ ।
"मनोर्वैवस्वतस्यैते वर्त्तन्ते साम्प्रतेऽन्तरे ।
इक्ष्वाकुप्रमुखाश्चैव दशपुत्त्रा महात्मनः ॥"
तथाच तत्रैव । ८ । ४३ ।
"तस्य ते कीर्त्तयिष्यामि मनोर्वैवस्वतस्य ह ।
विसर्गं भरतश्रेष्ठ साम्प्रतस्य महाद्युतेः ॥" )

साम्ब,क सम्बन्धे । इति कविकल्पद्रुमः ॥ (चुरा० पर०-सक०-सेट् । ) ओष्ठ्यवर्गशेषोपधः । द्वितीयस्वरी । क, साम्बयति धनं लोकः संबध्नाति इत्यर्थः । इति दुर्गादासः ॥

साम्बरं, क्ली, ( सम्बरदेशे भवम् । अण् । गड़लवणम् । यथा,—
"गड़ादिलवणं शुभ्रं पृथ्वीजं गड़देजम् ।
गड़ोत्थञ्च महारम्भं साम्बरं सम्बरोद्भवम् ॥"
इति राजनिर्घण्टः ॥

साम्बरी, स्त्री,(सम्बरेण कृता । सम्बर+अण्+ङीप् । ) माया । यथा,—
"शाम्बरी साम्बरी माया मायाकृद्भिक्षुके नटे"
इति शब्दरत्नावली ॥

साम्भवी, स्त्री, रक्तलोध्रः । इति शब्दचन्द्रिका ॥

साम्मातुरः,पुं,(सम्मातुरपत्यं पुमान् । सम्मातृ+"मातुरुत्संख्यासंभद्रपूर्व्वायाः ।"४।१।११५।इति अण् । उकारश्च । ) सतीतनयः । तत्पर्य्यायः । भाद्रमातुरः २ । इति हेमचन्द्रः । ३ । २२० ॥

साम्यं, क्ली, ( समस्य भावः । सम+ष्यञ् । ) समता । तुल्यत्वम् । यथा,—
"चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति ॥"
इति प्रायश्चित्ततत्त्वम् ॥
साम्यन्त्वेकस्थानत्वम् । इति मुग्धबोधव्याकरणम् ॥ ( साम्यावस्थापन्ने, त्रि । यथा, भागवते । ८ । ३ । १२ ।
"नमः शान्ताय घोराय मूढ़ाय गुणधर्म्मिणे ।
निर्व्विशेषाय साम्याय नमो ज्ञानघनाय च ॥"

साम्राज्यं, क्ली, ( सम्राजो भावः । ष्यञ् । ) समस्तराज्यम् । ( यथा, रघुः । ४ । ५ ।
"छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥"
दशलक्षाधिपत्यम् । यथा,—
"लक्षाधिपत्यं राज्यं स्यात् साम्राज्यं दशलक्षके ।
शतलक्षे महेशानि महासाम्राज्यमुच्यते ॥"
इति वरदातन्त्रे २ पटलः ॥

साम्राणिकर्द्दमं, क्ली, जवादिनामकगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

साम्राणिजं, क्ली, महापारेवतम् । इति राजनिर्घण्टः ॥

सायं,व्य, (स्यति समापयति दिनमिति । सो+बाहुलकात् णम् । युगागमश्च । ) सायाह्नः । इत्यमरः । ३ । ४ । १८ । सन्ध्या । इति राजनिर्घण्टः ॥ तथा,—
"दिनान्ते पुंसि सायः स्यात् सायाह्ने सायमव्ययम् ।"
इति शब्दार्णवः ॥
( यथा, रघुः । १ । ४८ ।
"सदुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः ।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥")

सायंकालः, पुं, ( सायं सायाह्नः कालः । ) सायाह्नः । सायंसन्ध्यासमयः । यथा, स्मृतिसागरधृतमत्स्यसूक्तम् ।
"ज्येष्ठा वाप्यथवा षष्ठी सायंकाले न चेद्भवेत् ॥
सायमेव तथापि स्याद्बिल्वशाखाभिमन्त्रणम् ॥"
इति तिथ्यादितत्त्वम् ॥

सायंसन्ध्या, स्त्री, (सायं सायाह्ने या सन्ध्या ।) सायंकालोपास्या देवता । सायंकालकर्त्तव्योपासना । सायंसन्ध्योपासनाकालश्च । तत्प्रमाणं सन्ध्याशब्दे द्रष्टव्यम् । पश्चिमा सन्ध्या । तस्या उत्पत्तिर्यथा,—
मार्कण्डेय उवाच ।
"नारायणः स्वयं सन्ध्यां पस्पर्शायाग्रपाणिना ।
ततः पुरोडाशमयं तच्छरीरमभूत् क्षणात् ॥
महामुनेर्म्महायज्ञे तस्मिन् विश्वोपकारिणि ।
नाग्निः क्रव्यादतां यातीत्येतदथ तथा कृतम् ॥
एवं कृत्वा जगन्नाथस्तत्रैवान्तरधीयत ।
सन्ध्याप्यगच्छद्यत्रेज्ये तत्र मेधातिथिर्मुनिः ॥
अथ विष्णोः प्रसादेन केनाप्यनुपलक्षिता ।
प्रविवेश तदा यज्ञं सन्ध्या मेधातिथेर्मुनेः ॥
वशिष्ठेन पुरा या तु वर्णिभूता तु सा सुता ।
उपदिष्टा तपश्चर्त्तुं वचनात् परमेष्ठिनः ॥